# [illegible]

श्री बृहद् गुजरात संस्कृत परिषद्
अहमदाबाद-९

○ सम्पादकाः ○

❖ प्रा. सुरेशचन्द्र दवे ❖ डॉ. भगवतीप्रसाद पण्ड्या ❖ डॉ. वासुदेव पाठक

श्री बृहद् गुजरात संस्कृत परिषद्,
अहमदाबाद-९

पञ्जियतक्रमाङ्कः आर. एन्. १०९९७/५१
श्री बृहद् गुजरात संस्कृत परिषदः मुखपत्रम्
ISSN - 2249-9369

# साम्मनस्यम्

*सहृदयं साम्मनस्यमविद्वेषं कृणोमि वः ।*
*अन्योन्यमभहर्यत वत्सं जातमिवाघ्न्या ॥* — *अथर्ववेदे*

अङ्क : १००
मार्च – २०१६

*आ नो भद्राः क्रतवो यन्तु विश्वतो-*
*ऽदब्धासो अपरीतास उद्भिदः ।*
*देवा नो यथा सदमिद् वृधे अस-*
*न्नप्रायुवो रक्षितारो दिवे दिवे ॥ १ ॥*

કલ્યાણકારી, વંચનારહિત, પ્રતિરોધ વિનાના તથા અર્થસાધક વિચારો બધી દિશાઓમાંથી અમને આવી મળો. આળસરહિત અને દરરોજ રક્ષણ કરનારા દેવો હમેશાં અમારી વૃદ્ધિ માટે બની રહો.

*देवानां भद्रा सुमतिर्ऋजूयतां*
*देवानां रातिरभि नो नि वर्तताम् ।*
*देवानां सख्यमुप सेदिमा वयं*
*देवा न आयुः प्रतिरन्तु जीवसे ॥ २ ॥*

સરળ હૃદયના યજમાનોને ચાહનારા દેવોની કલ્યાણકારી સુમતિ તથા દેવોનું દાન અમારી તરફ પાછાં વળો. અમે દેવોની મિત્રતા પ્રાપ્ત કરીએ. દેવો અમારે જીવવા માટે અમારા આયુષ્યની વૃદ્ધિ કરો.

*तन्नो वातो मयोभु वातु भेषजं*
*तन्माता पृथिवी तत्पिता द्यौः ।*
*तद्ग्रावाणः सोमसुतो मयोभुव-*
*स्तदश्विना शृणुतं धिष्ण्या युवम् ॥ ३ ॥*

વાયુદેવ તે સુખદાયી ઔષધને (હિતકારકને) અમારી પાસે પહોંચાડો. માતા પૃથ્વી તે ઔષધને અને પિતા દ્યુલોક તે ઔષધને અમારી પાસે પહોંચાડો. હે બુદ્ધિમાન અશ્વિનો, તમે બંને તે સાંભળો.

*तमीशानं जगतस्तस्थुषस्पतिं*
*धियंजिन्वमवसे हूमहे वयम् ।*
*पूषा नो यथा वेदसामसद्वृधे*
*रक्षिता पायुरदब्धः स्वस्तये ॥ ४ ॥*

ચર અને અચરના પતિ, મંત્રોના પ્રેરક તે ઐશ્વર્યવાન ઈશાનનું અમે રક્ષણ માટે આવાહન કરીએ છીએ. તેથી રક્ષક, પાલક અને નિષ્કપટ પૂષા અમારી સંપત્તિઓની કલ્યાણકારી વૃદ્ધિ માટે થાવ.

— *ऋग्वेदे प्रथममण्डले*

— ઋગ્વેદ : પ્રથમ મંડલ

Scanned with CamScanner

## अस्मिन्नङ्के

सामनस्यम्
हिन्दीमयानि द्वादशमुक्तकानि
योगसाधनायाम् अहिंसायाः उपादेयता
स्त्रीणां विवादो निर्णेतुं स्त्रीभिरेव हि युज्यते
पञ्चयागविचारः
बालसुभाषितपीयूषम्
कृष्णं वन्दे जगद्गुरुम्
सद्व्यवहारः.
श्याम हे
संघे शक्तिः कलौ युगे
हिन्दी काव्यम् – संस्कृतकाव्यम्
મધ્યમવ્યાયોગનો ત્રીજો મધ્યમ ઘટોત્કચ
વેદનું શ્રદ્ધાસૂક્ત
વેદનું સંજ્ઞાનસૂક્ત
મા. જસ્ટીસ એસ. ડી. દવેના ગ્રંથને
આંતરરાષ્ટ્રીય માન્યતા
શ્રી બૃ. ગુ. સં. પરિષદ – વિવિધ સમિતિઓ
આનંદમીમાંસા
वृत्तनवनीतम्

### साम्मनस्यम्–परामर्श–समितिः

ડૉ. ચંદ્રકાન્ત મહેતા
ડૉ. ગીતાબેન મહેતા
શ્રી દેવશંકર પી. દીક્ષિત
ડૉ. મોહિનીબેન આચાર્ય
પં. હિતેન્દ્ર વ્યાસ
પં. શ્રીધર વ્યાસ

प्रकाशक :
प्रा. सुरेशचन्द्र ज. दवे
प्रधानमंत्री
श्री बृ. गु. संस्कृत परिषद्
शेठ श्री रतिलाल मो. भा. संस्कृत भवन
अहमदाबाद–९
दूरध्वनि–२६५८९७६६

मुद्रक :
धुमिल ग्राफिक्स
पटेल दिलीप आई.
८५६, नारणपुरा गाम,
अहमदाबाद–३८००१३
मो. ९३७५९२०५२९

Scanned with CamScanner

# कृष्णं वन्दे जगद्गुरुम्

– डो. नरेन्द्रकुमार पण्ड्या
वेरावल (गूजरात)

बाललीलाप्रसङ्गेन सख्यभावोपदेशनम् ।
कुर्वन्तं सर्वलोकानां कृष्णं वन्दे जगद्गुरुम् ॥१॥

पूतनासुपयःपानं कृत्वा शिश्चवनं कृतम् ।
येन बाल्यसुरक्षार्थं कृष्णं वन्दे जगद्गुरुम् ॥२॥

गोसेवामाध्यमेनैव गोपालनसुकर्म यः ।
उपादिशत्तं गोविन्दं कृष्णं वन्दे जगद्गुरुम् ॥३॥

कालियदमनं कृत्वा दूषिताशुद्धिकर्म यः ।
कृतवान् जलशोधार्थं कृष्णं वन्दे जगद्गुरुम् ॥४॥

गोवर्धनगिरिं धृत्वा श्रीमान् गोवर्धनः प्रभुः ।
उद्दधार विपद्भ्यः स्वान् कृष्णं वन्दे जगद्गुरुम् ॥५॥

कर्म प्रधानं सर्वत्र कर्मैव फलदं नृणाम् ।
सिद्धान्तं दिष्टवान् यस्तं कृष्णं वन्दे जगद्गुरुम् ॥६॥

श्रीगोवर्धनयागेन कर्ममाहात्म्यमुक्तवान् ।
यस्तं गोवर्धनं देवं कृष्णं वन्दे जगद्गुरुम् ॥७॥

कृत्वा गीतोपदेशं यः पार्थस्यापजहार ह ।
विषादं तं प्रसन्नास्यं कृष्णं वन्दे जगद्गुरुम् ॥८॥

तृणावर्तबकाघादिनैकदैत्यविमर्दनात् ।
आतङ्कनाशको यस्तं कृष्णं वन्दे जगद्गुरुम् ॥९॥

नवनीतरक्षणं यो गोकुलस्यैव गोकुले ।
कृतवान् स्वात्मपोषार्थं कृष्णं वन्दे जगद्गुरुम् ॥१०॥

सुदामसख्यभावेन भुवि विख्यातिमागतम् ।
मित्रतादर्शकं शिष्टं कृष्णं वन्दे जगद्गुरुम् ॥११॥



Scanned with CamScanner

शरद्राकारम्यदेशे वने वृन्दावने हरिम् ।
रसनिष्ठं रसाचार्यं कृष्णं वन्दे जगद्गुरुम् ॥१२॥

उज्जयिन्यां गुरोर्धाम्नि मुनेः सान्दीपनेः शुभे ।
विद्यामधीयानमहो कृष्णं वन्दे जगद्गुरुम् ॥१३॥

गार्हस्थ्यसमुदाचारशिक्षणार्थं गृहस्थितम् ।
प्रजातन्तुं सुतन्वन्तं कृष्णं वन्दे जगद्गुरुम् ॥१४॥

यज्ञदानतपःकर्म कृत्वा स्वेभ्यः स्वयं विभुः ।
उपादिशत् क्रियाशक्त्या कृष्णं वन्दे जगद्गुरुम् ॥१५॥

स्वभक्तपोषकं नित्यं दुष्टदैत्यनिबर्हकम् ।
सद्धर्मरक्षकं शश्वत् कृष्णं वन्दे जगद्गुरुम् ॥१६॥

इत्याचार्यनरेन्द्रकुमारपण्ड्यारचिता जगद्गुरुकृष्णषोडशी स्तुतिः ॥

## सद्व्यवहारः

– डो. वासुदेव वि. पाठक 'वागर्थ'
अहमदाबाद

विकसति पुष्पं सविश्वासम्
यद्
धरा धारयिष्यति माम्,
जलं रसार्द्रं करिष्यति,
सूर्यश्चावकारयिष्यति,
चन्द्रो मां पोषयिष्यति,
आकाशः स्थानं दास्यति,
वायुश्चान्दोलयिष्यति ।
सर्वे मत्कृते उपकारिणः ।
अहमपि,
गन्धेन मे,
प्रत्युपकरिष्यामि सानन्दम्
ऋणादनृणं भाव्यम्,
इति सद्व्यवहारः ॥

## श्याम हे

– डो. वासुदेव वि. पाठक 'वागर्थ'
अहमदाबाद

श्याम हे, श्याम हे सर्वसेव्य श्याम हे
गोपीजनवल्लभ हे, नंदकुंवर श्याम हे ।
वेदवेद्य हे वरेण्य विश्वविमोहक शरण्य,
व्रजविहारदक्ष दिव्य वंशीधर श्याम हे
श्याम हे श्याम हे ॥
राधिकया राधित हे श्रीराधासंराधक
सकलजीवजीवन हे जनमनोविश्राम हे
श्याम हे श्याम हे ॥
नित्यधर्मपालक हे धर्मकर्मकारक हे
निर्व्याजकर्मकुशल स्वयं पूर्णकाम हे
श्याम हे श्याम हे ॥

* * *

Scanned with CamScanner